नं० १०५५-घ

यजुर्वेदे नारायणोपनिषत् (उपनिषत्)

पत्राणि ११ (सम्पूर्णा)

नं० १०५५-घ

११

लिपिक: जवाहिर गिरि:

॥नाउ॰॥ श्रीगणेशायनमः॥ ॐ नमोभगवतेवासुदेवाय॥ हरिः ॐ॥ सहनाववतु सहनौभुनक्तु
॥१॥ सहवीर्यंकरवावहै तेजस्विनावधीतमस्तुमाविद्विषावहै॥ ॐ शांतिः शांतिः शांतिः ॐ।
अंभस्यपारेभुवनस्यमध्येनाकस्यपृष्ठेमहतोमहीयान्॥ शुक्रेणज्योतीꣳषिसमनुप्रवि।
ष्टः प्रजापतिश्चरतिगर्भेअंतः॥ यस्मिन्निदꣳसंचविचैतिसर्वंयस्मिंदेवाअधिविश्वेनिषेदुः॥ नि
तदेवभूतंतदुभव्यमाइदंतदक्षरेपरमेव्योमन्॥ येनावृतंखंचदिवंमहींचयेनादित्यःस्तपति तेज
सा भ्राजसाच॥ यमंतःसमुद्रेकवयोवयंतियदक्षरेपरमेप्रजाः॥ यतःप्रसूताजगतःप्रसूतीतोये
नजीवान्व्यचसर्जभूम्यां॥ यदोषधीभिःपुरुषान्पशूꣳश्चविवेशभूतानिचराचराणि॥ अ
तःपरंनान्यदणीयसꣳहिपरात्परंयमहतोमहांतं॥ यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतम
॥२॥ सःपुरस्तात्॥ तदेवर्तंतदुसत्यमाहुःस्तदेवब्रह्मपरमंकवीनां॥ इष्टापूर्तंबहुधाजातंजायमानंवि
श्वंबिभर्तिभुवनस्यनाभिः॥ तदेवाग्निःस्तद्वायुस्तत्सूर्यःस्तदुचंद्रमाः॥ तदेवशुक्रममृतंतद्ब्रह्म
तदापःसप्रजापतिः॥ सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि॥ कलामुहूर्ताःकाष्ठाश्चाहोरात्रा
श्चसर्वशः॥ अर्धमासामासाऋतवःसंवत्सरश्चकल्पंतां॥ सआपःप्रदुघेउभेइमेअंतरिक्षम
थोसुवः॥ नैनमूर्ध्वंनतिर्यंचंनमध्येपरिजग्रभत्॥ नतस्येशेकश्चनतस्यनाममहद्यशः॥ नसं
दृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनं॥ हृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृ
तास्तेभवंति॥ अद्भ्यःसंभूतोहिरण्यगर्भइत्यष्टौ॥ एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातः
सउगर्भेअंतः॥ सविजायमानःसजनिष्यमाणःप्रत्यङ्मुखास्तिष्ठतिविश्वतोमुखः॥ विश्व
तश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वतस्पात्॥ संबाहुभ्यांनमतिसंपतत्रैर्द्यावाप्र। ॥१॥

थिवीजनयंदेवएकः॥वेनस्तत्पश्यंभुवनानिविद्वान्यत्रविश्वंभवत्येकनीडं॥यस्मिन्निदꣳसंचवि
चैकꣳसओतःप्रोतश्चविभुःप्रजासु॥प्रतद्वोचेअमृतंनुविद्वान्गंधर्वोनामनिहितंगुहासु॥त्रीणि
पदानिनिहितागुहासुयस्तद्वेदसवितुःपितासत्॥सनोबंधुर्जनितासविधाताधामानिवेदभुवनानि
विश्वा॥यत्रदेवाअमृतमानशानास्तृतीयेधामान्यभ्यैरयंत॥परिद्यावापृथिवीयंतिसद्यःपरि
लोकान्परिदिशःपरिसुवः॥ऋतस्यतंतुंविततंविचृत्यतदपश्यत्तदभवत्प्रजासु॥परीत्यलोकान्
परीत्यभूतानिपरीत्यसर्वाःप्रदिशोदिशश्च॥प्रजापतिःप्रथमजाऋतस्यात्मनात्मानमभिसंब
भूव॥सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं॥सनिमेधामयासिषं॥उद्दीप्यस्वजातवेदोपघ्नन्निर्ऋ
तिंमम॥पशूꣳश्चमह्यमावह जीवनंचदिशोदिश॥मानोहिꣳसीज्जातवेदोगामश्वंपुरुषंजगत्॥
अबिभ्रदग्नआगहिश्रियामापरिपातय॥पुरुषस्यविद्मसहस्राक्षस्यमहादेवस्यधीमहि॥तन्नो
रुद्रःप्रचोदयात्॥तत्पुरुषायविद्महेमहादेवायधीमहि॥तन्नोरुद्रःप्रचोदयात्॥तत्पुरुषायविद्म
हेवक्रतुंडायधीमहि॥तन्नोदंतिःप्रचोदयात्॥ तत्पुरुषायविद्महेमहासेनायधीमहि॥तन्नःषण्मु
खःप्रचोदयात्॥तत्पुरुषायविद्महेसुवर्णपक्षायधीमहि॥तन्नोगरुडःप्रचोदयात्॥वेदात्मनायवि
द्महेहिरण्यगर्भायधीमहि॥तन्नोब्रह्मप्रचोदयात्॥नारायणायविद्महेवासुदेवायधीमहि॥त
न्नोविष्णुःप्रचोदयात्॥वज्रनखायविद्महेतीक्ष्णदꣳष्ट्रायधीमहि॥तन्नोनारसिꣳहःप्रचोदया
त्॥भास्करायविद्महेमहद्युतिकरायधीमहि॥तन्नोआदित्यःप्रचोदयात्॥वैश्वानरायविद्महे
लालीलायधीमहि॥तन्नोअग्निःप्रचोदयात्॥कात्यायनायविद्महेकन्यकुमारिधीमहि॥तन्नो
दुर्गिःप्रचोदयात्॥सहस्रपरमादेवीशतमूलाशतांकुरा॥सर्वꣳहरतुमेपापंदूर्वादुःस्वप्ननाशि

तत्पुरुषायविद्महेचक्रतुंडायधीमहि तन्नोदंतिःप्रचोदयात्

॥ना॰उ॰॥ नी॥ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः परि॥ एवानो दूर्वे प्रतनु सहस्रेण शतेन च॥ या शतेन
॥२॥ प्रतनोषि सहस्रेण विरोहसि॥ तस्यास्ते देवीष्टके विधेम हविषा वयं॥ अश्वक्रान्ते रथक्रान्ते विष्णु
क्रान्ते वसुंधरा॥ शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥ भूमिर्धेनुर्धरणी लोकधारिणी॥ उध्द
तासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हन मे पापं यन्मया दुःकृतं कृतं॥ मृत्तिके ब्रह्मदत्ता
सि काश्यपेनाभिमन्त्रिता॥ मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं॥ मृत्तिके प्रतिष्ठिते सर्वं त
न्मे निर्णुद मृत्तिके॥ तया हतेन पापेन गच्छामि परमां गतिं॥ यत इन्द्र भयामहे ततो नो अभयं कृ
धि॥ मघवंछग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृ
धो वशी॥ वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा वि
श्ववेदाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ अपांतमन्युस्तृपलप्रभ
र्मा धुनिः शिमीवांछरुमाँ ऋजीषी॥ सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः॥ १
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः॥ स बुध्निया उपमा अस्य विष्ठाः सतश्च
योनिमसतश्च विवः॥ स्योना पृथिवि भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथाः॥ गंधद्वा
रां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ श्रीर्मे भजतु॥
अलक्ष्मीर्मे नश्यतु॥ विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्॥ महाँ
इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु॥ स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि॥ सो
औ मानं स्वरणं कृणुहि ब्रह्मणस्पते कक्षीवन्तं य [illegible]जं॥ शरीरं यज्ञशमलं कुसीदं तस्मिन्सी ॥२॥
दतु योऽस्मान्द्वेष्टि॥ चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि॥ तेन पवित्रेण शु

ढेनपृतनाअतिपाप्मानमरातिंतरेम॥ सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहंछूरविद्वान्।
जहिशत्रूꣳरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः॥ सुमित्रानआपओषधयःसंतु दु
र्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मः॥ आपोहिष्ठामयोभुव॥ स्तानऊर्जे॰महेरणाय दधातन ११
चक्षसे॥ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥ तस्माअरंगमामवोयस्य
क्षयायजिन्वथ॥ आपोजनयथाचनः॥ हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः॥ यन्म
याभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः॥ यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं॥ तन्नइंद्रोव
रुणोबृहस्पतिःसवितावपुनंतुपुनःपुनः॥ नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवा
रुण्यैनमोद्भ्यः॥ यदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतात्॥ अत्याशनादतीपानाद्यच्चउग्रा
प्रतिग्रहात्॥ तन्नोवरुणोराजापाणिनाह्यवमर्शतु॥ सोहमपापोविरजोनिर्मुक्तोमुक्तकिल्बि
षः॥ नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां॥ यश्चाप्सुवरुणःसपुनात्वघमर्षणः॥ इमंमेगंगे
यमुनेसरस्वतिशुतुद्रि स्तोमꣳसचतापरुष्णिया॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणु
ह्यासुषोमया॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत॥ ततोरात्रिरजायततततःसमुद्रोअर्णवः। १२
समुद्रादर्णवादधिसंवत्सरोअजायत॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी॥ सूर्याचंद्र
मसौधातायथापूर्वमकल्पयत्॥ दिवंचपृथिवींचांतरिक्षमथोसुवः॥ यत्पृथिव्यांरजस्
मांतरिक्षेविरोदसी॥ इमाꣳस्तदापोवरुणःपुनात्वघमर्षणः॥ एषभूतस्यमध्येभुवनस्यगोप्ता॥
एषपुण्यकृतांलोकानेषमृत्योहिरण्मयं॥ द्यावापृथिव्योहिरण्मयꣳसꣳश्रितꣳसुवः॥ सनः
सुवःसꣳशिशाधि॥ आर्द्रंज्वलतिज्योतिरहमस्मि॥ ज्योतिर्ज्वलतिब्रह्माहमस्मि॥ योहमस्मि ब्रह्मा

पुनंतुवसवःपुनातुवरुणःपुनात्वघमर्षणः ३

अहमस्मि ब्रह्माहमस्मि

॥ना॰उ॰॥ हमस्मि। अहमेवाहं मां जुहोमि स्वाहा। अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः॥ वरु
॥३॥ णोपामघमर्षणस्तस्मात्पापात्प्रमुच्यते। रजोभूमिस्त्वमांऽ रोदयस्व प्रवदंति धीराः॥ अक्रा
न्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य राजा॥ वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो
3 वावृधे सुवान इंदुः। परस्ताद्यशो गुहासु मम चक्रतुंडाय धीमहि। तीक्ष्णदंष्ट्राय धीमहि परि
प्रतिष्ठितं देभुये छतुरद्धातनाग्नौ लीवः सुवो राजेवैव। रुद्रो रुद्रश्च दंतिश्च नंदिः षण्मुख
एवं च। गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च। आदित्योग्निश्च दुर्गिश्च क्रमेण द्वादशा
भसि। ममवचचवसुवेनाव भावैकात्यायनाय॥१॥ जातवेदसे सुनवाम सोममरातीयतो निद
हाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्व
लंतीं वैरोचनीं कर्मफलेषु जुष्टां। दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ अग्ने त्वं
पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय
तनयाय शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिपर्षि॥ अग्ने अत्रिवन्मन
सा गृणानो स्माकं बोध्यविता तनूनां॥ पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्स
धस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः॥ प्रत्नोषि कमीड्यो अ।
ध्वरेषु सनाच्च होता नव्यश्च सत्सि॥ स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥
गोभिर्जुष्टमयुजो निषिक्तं तवेंद्र विष्णोरनुसंचरेम॥ नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लो
क इह मादयंतां॥२॥ भूरन्नमग्नये पृथिव्यै स्वाहा भुवोन्नं वायवेंतरिक्षाय स्वाहा सुवरन्न ॥३॥
मादित्याय दिवे स्वाहा भूर्भुवः सुवरन्नं चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो

भूर्भुवः सुवरन्नमों ॥ भूरग्नये पृथिव्यै स्वाहा भुवो वायवेंतरिक्षाय स्वाहा सुवरादित्याय दिवे स्वा
हा भूर्भुवः सुवश्चंद्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवः ॥ भूरग्न रन्नओम्
ये च पृथिव्यै च महते च स्वाहा भुवो वायवे चांतरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे
च महते च स्वाहा भूर्भुवः सुवश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः स्व
मेहरोम् धा पितृभ्यो भूर्भुवः सुवः ॥ पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा । यज्ञं
पाहि विभावसो स्वाहा । सर्वं पाहि शतक्रतो स्वाहा । पाहि नो अग्न एकया । पाह्युत द्वितीयया । पा
ह्यूर्जं तृतीयया । पाहि गीर्भिश्चतसृभिर्वसो स्वाहा ॥ यश्छंदसामृषभो विश्वरूपः छंदोभ्यः छं
दांऽस्याविवेश । सचांऽशिक्यः पुरोवाचोपनिषदिंद्रो ज्येष्ठ इंद्रियाय ऋषिभ्यो नमो देवेभ्यः
स्वधा पितृभ्यो भूर्भुवः सुवश्छंद ओम् । नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भू
यासं कर्णयोः श्रुतं मा च्योढं ममामुष्य ओं ॥ ऋतं तपः सत्यं तपः श्रुतं तपः शांतं तपो दमस्तपः श
मस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः ॥ ३ ॥ यथा वृक्षस्य संपुष्पितस्य दूरा
द्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति यथासिधारां कर्तेवहितामवक्रामे यद्युवे युवे हवा
विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत् । अणोरणीयान्महतो महीयाना
त्मा गुहायां निहितोस्य जंतोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं ॥ सप्त प्रा
णाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः । सप्त इमे लोका येषु चरंति प्राणा गुहाशयांनि
हिताः सप्त सप्त । अतः समुद्रा गिरयश्च सर्वेस्मात्स्यंदंते सिंधवः सर्वरूपाः ॥ अतश्च विश्वा ओष
धयो रसाश्च येनैष भूतस्तिष्ठत्यंतरात्मा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृ

॥ना॰उ॰॥ गाणां॥ श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्॥ अजामेकां लोहितशुक्लकृ
॥६॥ ष्णां बह्वीं प्रजां जनयंतीꣳ सरूपां। अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः॥
हꣳसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धा
म। अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं॥ समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳ
शुना सममृतत्वमानट्॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः। वयं नाम
प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः। उप ब्रह्मा शृणवच्छस्यमानं चतुःशृंगोवमी
द्गौर एतत्॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रो
रवीति महो देवो मर्त्याꣳ आविवेश॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविं
दन्। इंद्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः॥ यो देवानां प्रथमं पुरस्ताद्वि
श्वाधियो रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानꣳ स नो देवः शुभया स्मृत्या संयुनक्तु॥ न
यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि
तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं॥ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः॥
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशंति। वेदांतविज्ञानसुनिश्चितार्थाः संन्या
सयोगाद्यतयः शुद्धसत्वाः॥ ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे॥ दहं वि
पापं परमेश्वभूतं यत्पुंडरीकं पुरमध्यसꣳस्थं। तत्रापि दहं गगनं विशोकः तस्मिन्यदंतः ॥६॥
स्तदुपासितव्यं॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः

समुद्रेश्वरः। अजोन्यआविवेशा सर्वैं चवारिच। सहस्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं। विश्वंनारा
यणंदेवमक्षरंपरमंपदं। विश्वतःपरमान्नित्यंविश्वंनारायणं हरिं। विश्वमेवेदंपुरुषस्तद्विश्व
मुपजीवति। पतिंविश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं। नारायणंमहाज्ञेयंविश्वात्मानंप
रायणं। नारायणपरोज्योतिरात्मानारायणःपरः। नारायणपरंब्रह्मतत्त्वंनारायणःपरः। ना
रायणपरोध्याताध्यानंनारायणःपरः। यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा। अंतर्बहि
श्चतत्सर्वंव्याप्यनारायणस्थितः। अनंतमव्ययंकविं समुद्रेंतंविश्वशंभुवं। पद्मकोशप्र
तीकाशं हृदयंचाप्यधोमुखं॥ अधोनिष्ट्यावितस्त्यांतेनाभ्यामुपरितिष्ठति। ज्वालमाला
कुलंभाती विश्वस्यायतनंमहत्। संततं शिलाभिस्तुलंबत्याकोशसन्निभं। तस्यांतेसुषि
रं सूक्ष्मंतस्मिन्सर्वंप्रतिष्ठितं। तस्यमध्येमहानग्निर्विश्वार्चिर्विश्वतोमुखः। सोग्रभुग्वि
भजंतिष्ठन्नाहारमजरःकविः॥ तिर्यगूर्ध्वमधःशायीरश्मयस्तस्यसंतता॥ संतापयतिस्वंदेह
मापादतलमस्तकः॥ तस्यमध्येवन्हिशिखा अणीयोर्ध्वाव्यवस्थितः। नीलतोयदमध्य
स्थाद्विद्युल्लेखेवभास्वरा। नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा॥ तस्याःशिखायामध्येप
रमात्माव्यवस्थितः। सब्रह्मसशिवःसहरिःसेंद्रःसोक्षरःपरमस्वराट्। अपिवासंततापट्
व। आदित्योवाएषएतन्मंडलंतपतितत्रताऋचस्तदृचामंडलं सऋचांलोकोथयएषएत। ३
स्मिन्मंडलेर्चिषिपुरुषःस्तानियजूंषिसयजुषामंडलं सयजुषांलोकः। सैषात्रय्येवविवि
द्यातपतियएषोंतरादित्येहिरण्मयःपुरुषः। आदित्योवैतेजओजोबलंयशश्चक्षुःश्रोत्रमा
त्मामनोमन्युर्मनुर्मृत्युःसत्योमित्रोवायुराकाशः प्राणोलोकपालः। कः किंकंतत्सत्यम

द्रीप्यतेतानिसामानिससाम्नांलोकोथयएषएतस्मिन्मंडलेर्चि ३

सलोकतामाप्नोत्येतासामेव देवतानां सायुज्यं २

एष १

॥ना·उ·॥ न्नेमम् तोजीवोविश्वः कतमस्वयंभूब्रह्मै तदमृत एषपुरुषेभूतानामधिपतिर्ब्रह्मणः सायु
॥५॥ ज्यं सार्ष्टितां समानलोकतामाप्नोति य एवं वेदेत्युपनिषत् । निधनपतये नमः । निधन
पतांतिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिंगाय नमः । हिरण्याय नमः । हिरण्यलिंगाय नमः ।
5 सुवर्णाय नमः । सुवर्णलिंगाय नमः । दिव्याय नमः । दिव्यलिंगाय नमः । भवाय नमः । भवलिं
गाय नमः । शर्वाय नमः । शर्वलिंगाय नमः । शिवाय नमः । शिवलिंगाय नमः । ज्वलाय नमः ।
ज्वललिंगाय नमः । आत्माय नमः । आत्मलिंगाय नमः । परमाय नमः । परमलिंगाय नमः ॥
पृ एतत्सोमस्य सूर्यस्य सर्वलिंगं स्थापयति पाणिमंत्रं पवित्रं । सद्योजातं प्रपद्यामि सद्योजा
ताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः । वामदेवाय नमो ज्येष्ठाय नमः
श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय
नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ अघोरेभ्योथघोरे
भ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः । तत्पुरुषाय विद्महे म
हादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्मा
धिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ २१ ॥ नमो हिरण्यबाहवे हिरण्य
वर्णाय हिरण्यरूपाय हिरण्यपतयेंबिकापतय उमापतये पशुपतये नमो नमः । ऋतं
सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः । सर्वो वै रुद्र
स्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रः सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं ॥५॥
जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ २४ ॥ कद्रुद्राय प्रचेतसे मीढुष्टमा

यतव्यसे। वोयेमश्रांतमहृदे। सर्वो ह्येषरुद्रस्तस्मैरुद्रायनमो अस्तु। यस्यवैकंकत्यग्निहोत्रहवणी
भवति प्रत्येवास्याहुतयस्तिष्ठं त्यथोप्रतिष्ठित्यै। रूणुष्वपाजइतिपंच। अदितिर्देवागंधर्वामनु
ष्याःपितरोसुरास्तेषां सर्वभूतानांमातामेदिनीमहतामहीसावित्रीगायत्रीजगत्युर्वीपृथ्वी
बहुलाविश्वाभूताकतमाकायासासत्येत्यमृतेतिवसिष्ठः। आपोवाइदं सर्वं विश्वाभूतान्या
पःप्राणावाआपःपशवआपोन्नमापोमृतमापःसम्राडापोविराडापःस्वराडापश्छंदांस्या ३
पोज्योतींष्यापोयजूंष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसुवरापओम्। आपःपुनं
तुपृथिवींपृथ्वीपूतापुनातुमां। पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां। यदुच्छिष्टमभोज्यं
यद्वादुश्चरितंमम। सर्वंपुनंतुमामापोसतांचप्रतिग्रहं स्वाहा॥१०॥ अग्निश्चमामन्युश्चम
न्युपतयश्चमन्युकृतेभ्यः। पापेभ्योरक्षंतां। यदन्हापापमकार्षं। मनसावाचाहस्ताभ्यां। पद्भ्या
मुदरेणशिश्ना। अहस्तदवलुंपतु। यत्किंचदुरितंमयि। इदमहंमाममृतयोनौ। सत्येज्योति
षिजुहोमिस्वाहा। सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः। पापेभ्योरक्षंतां। यद्रात्र्या त्रि
पापमकार्षंमनसावाचाहस्ताभ्यां। पद्भ्यामुदरेणशिश्ना। रात्रिस्तदवलुंपतु। यत्किंचदुरितं
मयि। इदमहंमाममृतयोनौ। सूर्येज्योतिषिजुहोमिस्वाहा॥ ओमित्येकाक्षरंब्रह्म। अग्निर्देव
ताब्रह्मइत्यार्षं। गायत्रंछंदं परमात्मंस्वरूपं। सायुज्यंविनियोगं। आयातुवरदादेवी अक्षरंब्र
ह्मसंमितं। गायत्रीछंदसांमाता। इदंब्रह्मजुषस्वमे। यदन्हात्कुरुतेपापंतदन्हात्प्रतिमुच्यते। य
द्रात्रियात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते। सर्ववर्णेमहादेवि संध्याविद्येसरस्वति। ओजोसि
सहोसिबलमसिभ्राजोसिदेवानांधामनामासिविश्वमसिविश्वायुःसर्वमसिसर्वायुरभि

॥ना॰उ॰॥ भूरोम्। गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि। छंदर्षीनावाहयामि श्री
॥६॥ यमावाहयामि गायत्र्या गायत्री छंदो विश्वामित्र ऋषिः सविता देवता। अग्निर्मुखं ब्रह्मा शिरो वि
6 ष्णुर्हृदयं रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्या
यनसगोत्रा गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पंचशीर्षोपनयने विनियोगः। ॐ भूः 2
ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्। उत्तमे शिखरे जाते भू
म्यां पर्वतमूर्धनि। ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखं। स्तुतो मया वरदा वेदमाता प्रचो
दयंती पवने द्विजाता। आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं। मह्यं दत्वा प्रजातुं ब्रह्मलोकं। घृणिः
सूर्य आदित्यो न प्रभा वात्यक्षरं। मधुक्षरंति तद्रसं। सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म।
भूर्भुवः स्वरोम्। ब्रह्ममेतु मां। मधुमेतु मां। ब्रह्ममेव मधुमेतु मां। यास्ते सोम प्रजा वत्सोऽभि सो
अहं। दुःष्वप्नहं दुरुःष्वह। यास्ते सोम प्राणांस्तां जुहोमि। त्रिसुपर्णमयाचितं ब्राह्मणाय दद्
यात्। ब्रह्महत्यां वा एते घ्नंति। ये ब्राह्मणास्त्रिसुपर्णं पठंति। ते सोमं प्राप्नुवंति। आसहस्रात्पंक्तिं
पुनंति। ॐ ब्रह्ममेधया। मधुमेधया। ब्रह्ममेव मधुमेधया। अद्या नो देव सवितः प्रजावत्सा
वीः सौभगं। परा दुःष्वप्न्यं सुव। विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्म आसु
व। मधुवाता ऋतायते मधुक्षरंति सिंधवः। माध्वीर्नः संत्वोषधीः। मधुनक्तमुतोषसि म
धुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः॥ ॥६॥
माध्वीर्गावो भवंतु नः। य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्। भ्रूणहत्यां वा एते घ्नंति।

ये ब्राह्मणास्त्रिसुपर्णं पठंति । ते सोमं प्राप्नुवंति । आसहस्रात्पंक्तिं पुनंति । ॐ ब्रह्म मेधया । मधु मेध
या । ब्रह्ममेव मधु मेधया । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां । श्येनो गृध्रा
णां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् । हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदति
थिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । ऋचे त्वा रुचे त्वा स
मित्स्रवंति सरितो न धेनाः । अंतर्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि । हिरण्ययो
वेतसो मध्य आसां । तस्मिन्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्यासते हरयः स
प्त तीरे स्वधां दुहाना अमृतस्य धारां । य इदं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । वीरहत्यां वा एते ।
घ्नंति । ये ब्राह्मणास्त्रिसुपर्णं पठंति । ते सोमं प्राप्नुवंति । आसहस्रात्पंक्तिं पुनंति । ओम् । मेधा देवी जु
षमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना । त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः ॥ नू
त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विंदते वसु सा नो जुषस्व द्र
विणो न मेधे । मेधां म इंद्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा । वु
अप्सरासु च या मेधा गंधर्वेषु च यन्मनः । दैवी मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा ॥
आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा
सुप्रतीका जुषंतां । मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु । मयि मेधां मयि प्रजां मयींद्र इंद्रियं
दधातु । मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अ
भयं कृणोतु । पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सचतां नः शचीपतिः । परं मृत्यो अनु परे
हि पंथां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥

॥ना॰उ॰॥ वातं प्राणं मनसान्वारभामहे प्रजापतिं यो भुवनस्य गोपाः। स नो मृत्योस्त्रायतां पात्वꣳहसो ज्योग्जीवा
॥७॥ जरामशीमहि। अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुंचः। प्रत्यौहतामश्विना मृत्युमः
स्माद्देवानामग्ने भिषजा शचीभिः। हरिꣳ हरन्तमनुयंति देवा विश्वस्येशानं वृषभं मतीनां। ब्रह्म
सरूपमनु मेदमागादयनं मा विवधीर्विक्रमस्व। शल्कैरग्निमिंधान उभौ लोकौ सनेमहं। उभ
योर्लोकयोरृध्वाति मृत्युं तराम्यहं। मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः। प्रजां
मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम। मा नो महांतमुत मा नो अर्भकं मा न उक्षंतमु
त मा न उक्षितं। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ मा नस्तोके तनये
मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमः
सा विधेम ते। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो
अस्तु वयꣳ स्याम पतयो रयीणां। स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेंद्रः पुर एतु नः
स्वस्तिदा अभयंकरः॥५५॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं। उर्वारुकमिव बंधनान्मृ
त्योर्मुक्षीय मामृतात्॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हंतवे। तान्यज्ञस्य मायया सर्वानव
यजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा। देवकृतस्यैनसोवयजनमसि स्वाहा। मनुष्यकृतस्यैनसो
वयजनमसि स्वाहा। मनुष्यकृतस्यैनसोवयजनमसि स्वाहा। पितृकृतस्यैनसोवयजनमसि
स्वाहा॥ आत्मकृतस्यैनसोवयजनमसि स्वाहा। अन्यकृतस्यैनसोवयजनमसि स्वाहा। अस्मत्
कृतस्यैनसोवयजनमसि स्वाहा। यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा। यत्स्व ॥७॥
पंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्या

वयजनमसिस्वाहा। यद्विद्वाꣳ सश्चाविद्वाꣳ सश्चैनश्चकृमतस्यावयजनमसिस्वाहा। एनस एन
सोवयजनमसिस्वाहा। यद्वो देवाश्चकृमजिह्वया गुरु मनसो वा प्रयुती देवहेडनं। अरावा यो नो
अभिदुच्छुनायते तस्मिन्तदेनो वसवो निधेतन स्वाहा॥ ६०॥ कामो कार्षीन्नमो नमः। कामोकार्षीत्
कामः करोति नाहं करोमि कामः कर्त्ता नाहं कर्त्ता कामः कारयिता नाहं कारयिता एष ते कामका
मायस्वाहा॥ ६१॥ मन्युरकार्षीन्नमो नमः। मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्त्ता ना
हं कर्त्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा॥ ६२॥ तिलाञ्जुहोमि सरसाꣳ स
पिष्टान्गान्धार मम चित्ते रमं[illegible]तु स्वाहा। गावो हिरण्यं धनमन्नपानꣳ सर्वेषाꣳ श्रियै स्वाहा॥
पुष्टिं च श्रियं च लक्ष्मीं चैव कीर्तिं चानृण्यतां। ब्रह्मण्यं बहुपुत्रतां। श्रद्धामेधे प्रजाः संददातु स्वाहा॥ ६३॥
तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः। तिलाः पुनंतु मे पापं यत्किंचिद्दुरितं मयि
स्वाहा। चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः। गोस्तेयꣳ सुरापानं भ्रूणहत्या तिला शांतिꣳ
पुष्टि शमयंतु स्वाहा। श्रीश्च लक्ष्मीश्च कीर्तिं चानृण्यतां॥ ब्रह्मण्यं बहुपुत्रतां। श्रद्धामेधे प्रज्ञा तु
जातवेदः संददातु स्वाहा। प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपा
प्माभूयासꣳ स्वाहा॥ वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतो बुध्याकूतिः संकल्पा मे शुध्यं
तां ज्योतिरहं विरजा विपाप्माभूयासꣳ स्वाहा॥ त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोस्थी
नि मे शुध्यंतां ज्योतिरहं विरजा विपाप्माभूयासꣳ स्वाहा॥ शिरःपाणिपादपार्श्वपृष्ठोरूद
रजंघशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिरहं विरजा विपाप्माभूयासꣳ स्वाहा। उत्तिष्ठपु
रुषहरितपिंगललोहिताक्षि देहि देहि ददापयिता मे शुध्यंतां ज्योतिरहं विरजा विपाप्माभूयासꣳ

॥ना॰उ॰॥ स्वाहा॥६५॥ पृथिव्यापस्तेजोवायुराकाशा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥
॥८॥ शब्दस्पर्शरूपरसगंधा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ मनोवाक्कायकर्मा
8 णि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। अव्यक्तभावैरहंकारैर्मे शुध्यंतां ज्योति
रहं विरजा विपाप्मा भूयासं स्वाहा। आत्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वा
हा॥ अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। परमात्मा मे शुध्यंतां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा। क्षुधे स्वाहा। क्षुत्पिपासाय स्वाहा। विविट्यै स्वाहा। ऋ
ग्विधानाय स्वाहा। कषोत्काय स्वाहा। क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं। अभूति
मसमृद्धिं च सर्वां निर्णुद मे पाप्मानं स्वाहा। अन्नमयप्राणमयमनोमयविज्ञानमयमानंद
॥ मयमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। अग्नये स्वाहा। विश्वेभ्यो दे
वेभ्यः स्वाहा। ध्रुवाय भूमाय स्वाहा। ध्रुवक्षितये स्वाहा। अच्युतक्षितये स्वाहा। अग्नये स्वि
ष्टकृते स्वाहा। धर्माय स्वाहा। अधर्माय स्वाहा। अद्भ्यः स्वाहा॥ ओषधिवनस्पतिभ्यः स्वाहा।
रक्षोदेवजनेभ्यः स्वाहा। गृह्याभ्यः स्वाहा। अवसानेभ्यः स्वाहा। अवसानपतिभ्यः स्वाहा। सर्व
भूतेभ्यः स्वाहा। कामाय स्वाहा। अंतरिक्षाय स्वाहा। यदेजति जगति यच्च चेष्टति नाम्नो भागोय
न्नाम्ने स्वाहा। पृथिव्यै स्वाहा। अंतरिक्षाय स्वाहा। दिवे स्वाहा। सूर्याय स्वाहा। चंद्रमसे स्वाहा। न
क्षत्रेभ्यः स्वाहा। इंद्राय स्वाहा। बृहस्पतये स्वाहा। प्रजापतये स्वाहा। ब्रह्मणे स्वाहा। स्वधा पितृ
भ्यः स्वाहा। नमो रुद्राय पशुपतये स्वाहा। देवेभ्यः स्वाहा। पितृभ्यः स्वधास्तु। भूतेभ्यो नमः। म ॥८॥
नुष्येभ्यो हंता। प्रजापतये स्वाहा। परमेष्ठिने स्वाहा। यथा कूपः शतधारः सहस्रधारो अक्षितः॥

एवामे अस्तु धान्यꣳ सहस्रधारमक्षितं । धनधान्यै स्वाहा । ये भूताः प्रचरंति दिवानक्तं बलिमिछं
तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा । ओषधिव
नस्पतिभ्यः स्वाहांतरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा । वितुदस्य प्रेष्या एवं च । ॐ तद्ब्रु
त । ओं तद्वायुः ओं तदात्मा । ओं तत्सत्यं ॐ तत्सर्वं । ॐ तत्पुरोर्नमः । अंतश्चरति भूतेषु गुहायां विश्व
मूर्तिषु । त्वं यज्ञस्त्वं वषट्कारस्त्वमिंद्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः त्वं तदाप आ
पो ज्योती रसोमृतं ब्रह्म भूर्भुवः सुवरोम् । श्रद्धायां प्राणे निविष्टोमृतं जुहोमि । श्रद्धायामपा
ने निविष्टोमृतं जुहोमि । श्रद्धायां व्याने निविष्टोमृतं जुहोमि । श्रद्धायामुदाने निविष्टोमृतं
जुहोमि । श्रद्धायाꣳ समाने निविष्टोमृतं जुहोमि । ब्रह्मणि म आत्मामृतत्वाय । अमृतोपस्त
रणमसि । श्रद्धायां प्राणे निविष्टोमृतं जुहोमि । शिवो मा विशा प्रदाहाय । प्राणाय स्वाहा । श्रद्धाया
मपाने निविष्टोमृतं जुहोमि । शिवो मा विशा प्रदाहाय । अपानाय स्वाहा । श्रद्धायां व्याने निविष्टो
मृतं जुहोमि । शिवो मा विशा प्रदाहाय । व्यानाय स्वाहा । श्रद्धायामुदाने निविष्टोमृतं जुहोमि ।
शिवो मा विशा प्रदाहाय । उदानाय स्वाहा । श्रद्धायाꣳ समाने निविष्टोमृतं जुहोमि । शिवो मा
विशा प्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्मामृतत्वाय । अमृतापिधानमसि । श्रद्धा
यां प्राणे निविश्यामृतꣳ हुतं । प्राणमन्नेनाप्यायस्व । श्रद्धायामपाने निविश्यामृतꣳ हुतं । अपा
नमन्नेनाप्यायस्व । श्रद्धायां व्याने निविश्यामृतꣳ हुतं । व्यानमन्नेनाप्यायस्व । श्रद्धायामुदाने नि
विश्यामृतꣳ हुतं । उदानमन्नेनाप्यायस्व । श्रद्धायाꣳ समाने निविश्यामृतꣳ हुतं । समानमन्ने ।
नाप्यायस्व । अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्व

॥ना॰उ॰॥ मुख वाग्न आसन्। नसोः प्राणः। अक्ष्योश्चक्षुः। कर्णयोः श्रोत्रं। बाहुवोर्बलं। ऊरुवोरोजः। अरिष्टा।
॥९॥ विश्वान्यंगानि तनूः। तनुवा मे सह नमस्ते अस्तु मा मा हिंसीः। वयः सुपर्णा उपसेदुरिंद्रं। प्रियमे
१ धा ऋषयो नाधमानाः। अपध्वांतमूर्णुहि पूर्धि चक्षुः। मुमुग्ध्यस्मान्निधयेव बद्धान्। प्राणा
नां ग्रंथिरसि रुद्रो मा विशांतकः। तेनान्नेनाप्यायस्व। नमो रुद्राय विष्णवे मृत्युर्मे पाहि। त्वम
ग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृप
ते जायसे शुचिः। शिवेन मे संतिष्ठस्व। स्योनेन मे संतिष्ठस्व। सुभूतेन मे संतिष्ठस्व। ब्रह्मवर्च
सेन मे संतिष्ठस्व। यज्ञस्यर्धिमनु संतिष्ठस्वोपते यज्ञ नमः। उपते नमः। उपते नमः। सत्यं प
रं परं सत्यं सत्येन न सुवर्गाल्लोकाच्च्यवंते कदाचन सतां हि सत्यं तस्मात्सत्ये रमंते। तप
इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुराधर्षं तस्मात्तपसि रमंते। दम इति नियतं
ब्रह्मचारिणस्तस्माद्दमे रमंते। शम इत्यरण्ये मुनयस्तस्माच्छमे रमंते। दानमिति सर्वाणि भूता
+ नि प्रशंसंति दानान्नातिदुष्करं तस्माद्दाने रमंते। धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मा
न्नातिदुष्करं तस्माद्धर्मे रमंते। प्रजन इति भूयांसस्तस्माद्भूयिष्ठाः प्रजायंते तस्माद्भूयिष्ठाः।
प्रजनने रमंते। अग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमंते।
यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञे रमंते। मानसमिति। विद्वांसस्तस्माद्विद्वांस एव मानसे
रमंते। न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि परांसि न्यास एवा
नि त्यरेचयद्य एवं वेदेत्युपनिषत्॥ ७०॥ प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससा ॥९॥
र किं भगवंतः परमं वदंतीति तस्मै प्रोवाच। सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि।

सत्यंवाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदंति तप सा देवा देवतामग्र आयंतपस
ऋषयः सुवरन्वविंदं तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदं
ति दमेन दांताः किल्बिषमवधून्वंति दमेन ब्रह्मचारिणः सुवरगच्छंदमो भूतानां दुराधर्षं द
मे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदंति शमेन शांताः शिवमाचरंति शमेन नाकं मुनयोन्व
विंदं छमो भूतानां दुराधर्षं छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदंति दानं यज्ञानां वरूथं
दक्षिणा लोके दातारं सर्वभूतान्युपजीवंति दानेनारातीरपानुदंत दानेन द्विषंतो मित्रा भ
वंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं
प्रजा उपसर्पंति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदंति प्रजन
नं वै प्रतिष्ठा लोके साधु प्रजायास्तंतुं तन्वानः पितॄणामनृणो भवति तदेव तस्या अनृणं त
स्मात्प्रजननं परमं वदंत्यग्नयो वै त्रयीविद्या देवयानः पंथा गार्हपत्य ऋक्पृथिवी रथंतर
मन्वाहार्यपचनं यजुरंतरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीप
त्य रमं वदंत्यग्निहोत्रं सायंप्रातर्गृहाणां निष्कृतिः स्विष्टं सुहुतं यज्ञक्रतूनां प्रायणं सुव
र्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदंति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेना
सुरानपानुदंत यज्ञेन द्विषंतो मित्रा भवंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदंति मा
नसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजंत मा
नसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदंति न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः
कतमः स्वयंभुः प्रजापतिः संवत्सर इति संवत्सरोसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी

मेधामेधयो२

॥ना॰उ॰॥ असात्मा याभिरादित्यस्तपति रश्मिभिः स्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्र
॥१०॥ जायंते ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्र
द्धया मनीषामनीषया मनो मनसा शांतिः शांत्या चित्तं चित्तेन स्मृतिं स्मृत्या स्मारं स्मारे
ण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं ददत्सर्वाण्येतानि ददात्यन्नात्प्राणा भवंति
भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानंदो ब्रह्मयोनिः स वा एष पुरुषः पंचधा पं
चात्मा येन सर्वमिदं प्रोतं पृथिवी चांतरिक्षं च द्यौश्च दिशश्चावांतरदिशाश्च स वै सर्वमि
दं जगत्स सभूतं स भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वांतपसो वरि
ष्ठात्ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान् तस्मान्न्यासमेषां तपसाम
तिक्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मंस्त्वमसि विश्वसृत्तेजोदास्त्व क
मस्यग्नेरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चंद्रमस उपयामगृहीतोसि ब्र
ह्मणे त्वा महस ओमित्यात्मानं युंजीत तद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो
महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥ ७९ ॥ तस्यैवं विदुषो यज्ञस्य
स्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः
काम आज्यं मन्युः पशुस्तपोग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुर
ध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीध्रा यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सो
मपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहव ॥१०॥
नीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्म

ध्यं दिनꣳ सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातु
र्मास्यानि य ऋतवस्ते पशुबंधा ये संवत्सराश्च परिवत्सराश्च ते । चातुर्मास्यानि य ऋतवस्ते प
शुबंधा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृ
थ एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं
गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चंद्रमसः
सायुज्यꣳ सलोकतामाप्नोत्येतौ वै सूर्याचंद्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति त
स्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥ ८० ॥ अम्भस्येकपं
चाशत्कं जातवेदसे । चतुर्दश । भूरन्नं भूरग्नये भूरग्नये चैकमेकं पाहि पाहि चत्वारि चत्वा
रि यश्छंदसां द्वे नमो ब्रह्मणे ऋतं तपो । यथा वृक्षस्यैकमेकं मणोरणीयाꣳश्चतुस्त्रिꣳश एकं
त् । सहस्रशीर्षꣳ षड्विꣳशतिरादित्यो वा । एष आदित्यो वै तेज एकमेकं निधनपतये त्र
यो विꣳशतिः । सद्योजातं त्रीणि । वामदेवायैकमघोरेभ्यस्तत्पुरुषाय द्वे द्वे ईशानो नमो
हिरण्यबाहव एकमेकं । ऋतꣳ सत्यं द्वे सर्वो वै रुद्रश्चत्वारि । कद्रुद्राय त्रीणि यस्य वैकं
कतीकृणुष्व पाजो दिति । रापो वा इदꣳ सर्वमेकमापः । पुनंतु चत्वार्यग्निश्च सूर्यश्च नवनवो एकं
मित्येकाक्षरं चत्वार्यायातु पंचौजोसि द्वौत्तमे चत्वारि घृणिस्त्रीणि । ब्रह्ममेतु मां यास्ते अ
स्न हत्या द्वादश ब्रह्ममेधया घानदमंभूलाहत्यां । ब्रह्ममेधवा । ब्रह्मा देवानामिदं वीरहत्या
मेकान्नविꣳशतिरेकान्नविꣳशतिर्मेधा देवी मेधां म इंद्रश्चत्वारि चत्वार्यामां मेधा द्वे म
यि मेधां मेकमपैतु परं वा तं प्राणममुत्र भूयाद्धरिꣳ शल्कैरग्निमाच्छिदो मम त्यो मानो महांत ।

नमोरुद्रायैकं देवकृतस्यैकादश यद्वोदेवाकामोकार्षी मन्युःक्रार्षी द्वे द्वे

मानोमहांतं। मानस्तोके प्रजापते स्वस्तिदा। त्र्यंबकं येते सहस्रं मयुतं। द्वे द्वे तिलान्जुहोमि। गावः
श्रियं प्रजाः पंचतिलाः कृष्णाश्चोरस्य। श्रीप्रज्ञानु। जातवेदः सप्तप्राणो। वाक्छिरयुत्तिष्ठपुरुषं त्वक्
पंचपृथिवी शब्दमनोवाक्। व्यक्तात्मा अंतरात्मा। परमात्मा मेक्षुधे अन्नमय। पंचदशाग्नये।
स्वाहेकं। चत्वारिंशं शरीं तद्ब्रह्म। नवभ्रद्ध्यां। प्राणेनिविष्टोमृतं जुहोमि। चतुर्विंशतिश्रद्धायां। प्रा
णेनिविश्यामृतं हुतं। दशांगुष्ठमात्रः पुरुषोंगुष्ठं च। द्वे वाङ्मआसन्नष्टौ। वयः सुपर्णा प्राणा
नांग्रंथिरसि। द्वे द्वे नमोरुद्रायैकं। त्वमग्ने पृभिर्द्वे शिवेनमे संतिष्ठस्वै। प्राजापत्यं सत्तस्यैवमेकं।
मेकमशीतिः॥ २१८॥ ॐ सहनाववतु। सहनौभुनक्तु। सहवीर्यं करवावहै। तेजस्विनावधी
तमस्तु माविद्विषावहै॥ ॐ शांतिः शांतिः शांतिः॥ इति श्रीनारायणउपनिषद यजुर्वेद सं
पूर्णं॥ शुभं भवतु श्रीरस्तु। श्रीकृष्णार्पणं॥ देवकानटे। लिखितं। जवाहिरगिर। पठनार्थे॥